කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

විවෘත සහ දුරස්ථ අධ්‍යයන කේන්ද්‍රය

ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි ප්‍රථම පරීක්ෂණය
(බාහිර) - 2009

මානවශාස්ත්‍ර පීඨය

සංස්කෘත - SANS -E1015

සංස්කෘත වීරකාව්‍ය, උපදේශ කථා සාහිත්‍යය හා සංස්කෘත ඛණ්ඩකාව්‍ය සාහිත්‍යය

<u>පළමුවන ප්‍රශ්නය ඇතුළුව ප්‍රශ්න පහකට (05) පිළිතුරු සපයන්න.</u>

ප්‍රශ්න සංඛ්‍යාව : 08 යි                                                    කාලය : පැය 03 යි

---

01. පහත සඳහන් උද්ධෘතයන්ගෙන් හතරකට පමණක් සිංහලානුවාද සපයන්න.

(i)

विश्वास्य चैनां स प्रायादब्रवीच्च पुनः पुनः ।
प्रेषयिष्ये तवार्थाय वाहिनीं चतुरंगिणीम् ।
तया त्वामानयिष्यामि निवासं स्वं शुचिस्मिते ॥ २० ॥

इति तस्याः प्रतिश्रुत्य स नृपो जनमेजय ।
मनसा चिन्तयन्प्रायात्काश्यपं प्रति पार्थिवः ॥ २१ ॥

भगवांस्तपसा युक्तः श्रुत्वा किं नु करिष्यति ।
एवं संचिन्तयन्नेव प्रविवेश स्वकं पुरम् ॥ २२ ॥

मुहूर्तयाते तस्मिंस्तु कण्वोऽप्याश्रममागमत् ।
शकुन्तला च पितरं ह्रिया नोपजगाम तम् ॥ २३ ॥

विज्ञायाथ च तां कण्वो दिव्यज्ञानो महातपाः ।
उवाच भगवान्प्रीतः पश्यन्दिव्येन चक्षुषा ॥ २४ ॥

(शकुन्तलोपाख्यान

(ii)

प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु ।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ॥ २९
मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३०
ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥ ३२
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३

तां स नन्दनसंकाशां मृगपक्षिभिरावृताम्।
हर्म्यप्रासादसम्बाधां कोकिलाकुलनिःस्वनाम्। ३ ।
काञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम् ।
बह्वासनकुथोपेतां बहुभूमिगृहायुताम्। ४ ।
सर्वर्तुकुसुमै रम्यैः फलवद्भिश्च पादपैः।
पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम्। ५ ।
प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत।
निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत्। ६ ।
विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः।
समूलपुष्परचितैरशोकैः शोकनाशनैः। ७ ।

श्रीमद्वाल्मीकीयरामायणे सुन्दरकाण्डे पञ्चदशः सर्गः

(iv)

अथ कदाचित्तत्राधिष्ठाने कस्मिंश्चिद्देवायतने यात्रामहोत्सवः संवृत्तः। तत्र च नटनर्तकचारणसंकुले नानादेशागतजनावृते तौ सहचरौ भ्रमन्तौ कांचिद्राजकन्यां करेणुकारूढां सर्वलक्षणसनाथां कञ्चुकिवर्षधरपरिवारितां देवतादर्शनार्थं समायातां दृष्टवन्तौ। अथासौ कौलिकस्तां दृष्ट्वा विषार्दित इव दुष्टग्रहगृहीत इव कामशरैर्हन्यमानः सहसा भूतले निपपात । अथ तं तदवस्थमवलोक्य रथकारस्तद्दुःखदुःखित आप्तपुरुषैस्तं समुत्क्षिप्य स्वगृहमानाययत्। तत्र च विविधैः शीतोपचारैश्चिकित्सकोपदिष्टैर्मन्त्रवादिभिरुपचर्यमाणश्चिरात्कथंचित्सचेतनो बभूव । ततो रथकारेण पृष्टः—'भो मित्र, किमेवं त्वमकस्माद्विचेतनः संजातः । तत्कथ्यतामात्मस्वरूपम्। स आह—'वयस्य, यद्येवं तच्छृणु मे रहस्यं येन सर्वामात्मवेदनां ते वदामि । यदि त्वं मां सुहृदं मन्यसे। ततः काष्ठप्रदानेन प्रसादः क्रियताम्। क्षम्यतां यद्वा किंचित्प्रणयातिरेकादयुक्तं तव मयानुष्ठितम्।' सोऽपि तदाकर्ण्य बाष्पपिहितनयनः सगद्गदमुवाच—'वयस्य, यत्किंचिद्दुःखकारणं तद्वद । येन प्रतीकारः क्रियते यदि शक्यते कर्तुम्। उक्तं च—

औषधार्थसुमन्त्राणां बुद्धेश्चैव महात्मनाम्।
असाध्यं नास्ति लोकेऽत्र यद्ब्रह्माण्डस्य मध्यगम्॥ २१९॥

मित्रभेदः।

प्राणघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यम्
काले सत्त्या प्रदानं युवतिजनकथा मूकभावः परेषाम्
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पत्थः ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहिता विरमन्ति मध्याः
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्ध मुत्तमजना न परित्यजन्ति ॥

(नीतिशतकम्)

(vi)

सच[1]न्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्प[2]णैः ।
सवल्लकीकाकलिगीतनिस्वनै-
[3]र्विबोध्यते सुप्त इवाद्य मन्मथः ॥ ८ ॥

सितेषु हर्म्येषु निशासु योषितां
सुख[4]प्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य नू[5]नं भृशमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥ ९ ॥

ऋतुसंहारे

(vii)

20. ජිතාන්‍යතීර්ථ්‍යශාසනං හතව්‍යලීකශාසනං
මිත ප්‍රවෘත්ත භාෂණං සදා විමුක්තිභූෂණම්
විශුද්ධ ශීලසංවරං නිරුද්ධ පාපසඤ්ජවරං
ශරණ්‍යවජ්‍රපඤ්ජරං නමාමි ශාක්‍යකුඤ්ජරම්

21. නිරාශ්‍රයං නිරාශ්‍රවං නිරුද්ධසර්වලාලසං
නිරර්ගලං නිරාමිෂෙක්ෂණං නිරීහමච්‍යුතම්
නිරුත්තරං නිරාගසං නිරස්තතීර්ථ්‍ය දෙශනං
නිරාපදං සදා නමාමි තං නිරාත්මවාදිනම්

භක්ති පඤ්චාශිකා

02. "ශකුන්තලා උපාඛ්‍යානයේ ශකුන්තලා කුමරියගේ චරිතය සුශික්ෂිත, ගුණසම්පන්න, දුරදක්නා නුවණින් හෙබි කාන්තා චරිතයක් ලෙස නිරූපණයවේ." විමසන්න.

03. සුචරිතවත් සමාජයක් බිහි කිරීම සඳහා නීති ශතකයේ දැක්වෙන උපදේශයන්ගේ වැදගත්කම පිරික්සන්න.

04. "භක්ති ශතකය ශබ්ද රසයෙන් හා අර්ථ රසයෙන් පිරි විශිෂ්ට ගණයේ භක්ති කාව්‍යයකි" විමසීමක් කරන්න.

05. රාමායණයේ සුන්දර කාණ්ඩයෙහි ශ්‍රී ලංකාව පිළිබඳව කෙරෙන වර්ණනය ඇගයීමට ලක් කරන්න.

06. භගවත් ගීතාවේ එන කර්මයෝගය පිළිබඳ විචාර පූර්වක විමර්ශනයක් කරන්න.

07. 'පංචතන්ත්‍රය තිරිසන් චරිත උපයෝගී කොට ගෙන මිනිස් සමාජයේ අඩු ලුහුඬුකම් සදය උපහාසයට ලක්කරයි.' විමසන්න.

08. 'ඍතුසංහාරයේ මුඛ්‍ය රසය ශෘංගාරයයි' සනිදර්ශනව පැහැදිලි කරන්න.

*****************************